शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

अभिज्ञानशाकुन्तलम् नाम नाटकस्य श्लोक व्याख्या ।

प्रथमाङ्कात् –

'यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत् ।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयोः
न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥'

प्रस्तुतोऽयं श्लोकः ई० पू० प्रथम शताब्द्यां समुत्पन्नः संस्कृत साहित्याकाशो रविरिव भासमानः महाकविना कालिदासेन विलिखितः अभिज्ञानशाकुन्तलम् नाम नाटकस्य प्रथम अङ्के राजा दुष्यन्तस्य आखेट प्रसङ्गात् उद्धृतोऽस्ति। यदा राजा मृगार्थं धावन् रथस्य वेगं ... कारणं पृच्छति, सूतः मृगं अनुसरति ... तदा राजा अश्वानां गतिं प्रशंसन् रथवेगं निरन्तरयाति। कथयति –

यदालोके सूक्ष्मं सहसा तद् विपुलतां व्रजति यत अर्धे विच्छिन्नं तत् कृतसन्धानं इव भवति। यत् प्रकृत्या वक्रं तदपि नयनयोः समरेखम् (एकरूपम्) रथजवात् किञ्चित् मे दूरे न च क्षणम् अपि किञ्चित् पार्श्वे। (वर्तते इति)।

यत् = वस्तु आलोके = दर्शने सूक्ष्मं = लघुतरम् सहसा = अकस्मात् तत् = वस्तु विपुलतां = दीर्घतां व्रजति = प्राप्नोति, यत् अर्धे = वस्तुतः विच्छिन्नम् = विभक्तं तत् कृतसन्धानं = संयुक्तम् इव भवति, यत् = वस्तु प्रकृत्या = स्वभावतः वक्रं = तिर्यग्भूतं तदपि = तदवस्थापि नयनयोः = नेत्रयोः समा = समरेखा यस्य तत् = एकरूपमिति भावः, एवञ्च रथस्य = स्यन्दनस्य जवात् = वेगात् किञ्चिद्वस्तु मे = मम दूरे न = नास्ति न तु क्षणमपि कुत्र किञ्चित पार्श्वे = निकटे एव वर्तते।

अत्र द्वितीय पादे 'कृतसन्धानमिव' इत्यत्र उत्प्रेक्षा नामकालङ्कारः। अन्तिमे पादे 'क्षणमपि किञ्चित् न पार्श्वे न च दूरे' इत्यत्र रथजवस्य कारणात् पदार्थ-हेतुकं काव्यलिङ्गमलङ्कारः।

शिखरिणी छन्दम् – रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी इति लक्षणात्।

उपेन्द्र झा
30/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्यालय
पुरसेना, पूर्णियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

## वेणीसंहार नाटकम्

वेणीसंहारनाटकमाधारीकृत्य भीमसेनस्य चरित्रचित्रणम्।

वीररस प्रधाने वेणीसंहार नाटकस्य नायकः उग्रः धीरोद्धतः महाबली भीमसेनः शरीरेण शक्तिशाली, मानसिक क्रोधेन च दृढप्रतिज्ञ स्वभाववान् अस्ति। सः कौरवाणां विनाशार्थं यद्यपि एकाकी एव संहरणे क्षमः।

'प्रवृद्धं यद् वैरं मम खलु शिशोरेव कुरुभिः' (वेणी० 1/10) इति सः आत्मनःबाल्यकालात् शत्रुभावमजानीत। युधिष्ठिरस्य सन्धिविषयके प्रस्तावे भीमः दुस्सहमानः तस्मै विपरीतं घोषयति —

'कुर्यात् सन्धिं भीमो विग्रहयति यूयं घटत।' (वेणी० 1/10)

द्रौपद्याः अपमानं आलापेन स्मृत्वा सः दृढनिश्चयं अकरोत्। यत् मयि जीवति धार्तराष्ट्राः कदापि स्वस्थाः न भविष्यन्ति। 'स्वस्थाः भवन्तु मयि जीवति धार्तराष्ट्राः।' इति। कोपाविष्टः भीमः अग्रजमनुमतिं वा तृणमिव विस्मृत्य कथयति —

'अद्यैकं दिवसं ममासि न गुरुर्नाहं विधेयस्तव।' इति।

द्रौपद्याः केशपाश दुर्दशामवलोक्य सः भीमः प्रतिज्ञां करोति —

'मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥' (वेणी० 1/15)

द्रौपद्याः उन्मुक्तायाः वेण्याः संहारनाय सः तां कथयति —

'चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥' (वेणी० 1/21)

असौ परम सहयोगिनं परं श्रद्धेयं श्रीकृष्णं प्रति अति श्रद्धावान् आकर्ण्यति यद् भगवान् श्री कृष्णः सन्ध्यर्थं दुर्योधनस्य पार्श्वे अगच्छत्। दुष्टो दुर्योधनस्य छलेन तं गृहीतुं प्रायतत, परं स नष्टमनोरथो जातः, तदा भक्तो भीमसेनं भर्त्सयन् अकथयत् —

'आत्मारामा विहितरतयो निर्विकल्पे समाधौ,
ज्ञानोद्रेकाद् विघटिततमो ग्रन्थयः सत्त्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ॥' (वेणी० 1/23)

असौ वीरः पराक्रमी शत्रु संहारक्षमः अपि धर्मशीलः अस्ति। युद्धात् पूर्वं भीमेन गान्धारी धृतराष्ट्र विषये कृत आचारस्य शैली शालीनतायाः प्रमाणमस्ति। सः पुत्र शोकोपपीडितौ तौ अभिवादनार्थं सञ्जयाय निवेदयति — 'अनुल्लङ्घनीयः सदाचारः। न युक्तमनभिवाद्य गुरून् गन्तुम्। सञ्जय! पितरौ तस्य कुरु प्रणाम। अथवा तिष्ठ। एवं विश्राव्य नामकर्मणी वन्दनीयाः गुरवः।' इति

एवं दुर्योधनादि कौरव संहारः दृढ प्रतिज्ञः असौ युधिष्ठिरं कथयति —

'भूमौ क्षिप्तं शरीरं निहितमिदमसृक्चन्दनाभं निजाङ्गे
लक्ष्मीरार्ये निषण्णा चतुरुदधिपयःसीमया सार्धमुर्व्या।
भृत्याः मित्राणि योधाः कुरुकुलमखिलं दग्धमेतद्रणाग्नौ
नामैकं यद् ब्रवीषि क्षितिप! तदधुना धार्तराष्ट्रस्य शेषम् ॥'

इत्थमसौ क्रोधी शूरवीरः, दृढप्रतिज्ञः मातापितृगुरुभक्तः कृष्णभक्तश्च उत्तम नायकः भीमसेनः आसीदिति।

उपेन्द्र झा

30/9/20

[illegible]

[illegible]

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

अलङ्कार विवेचनम्

साहित्य दर्पणः दशमः परिच्छेदः

परिसंख्यानामकालङ्कारस्य विवेचनम् ।

प्रश्नात् अप्रश्नतो वा प्रतिपादितात् पदार्थात् यदि शाब्द आर्थो वा तथाविधस्य = प्रतिपादित तुल्यस्य, अन्यस्य वस्तुनः, व्यपोहः = निषेधो, भवेत्तदा परिसंख्या = इतरवर्जनबुद्धिरिति व्युत्पत्त्या तन्नाम अलङ्कारो भवेत् । उक्तं च साहित्य दर्पणे —

'प्रश्नादप्रश्नतो वापि कथिताद् वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥'

तत्र प्रश्नपूर्वक प्रतिपादने शाब्दी यथा —

'किं भूषणं सुदृढमत्र यशो न रत्नं किं
कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥'

अत्र व्यवच्छेद्यं (नैषेध्यम्) रत्नादि । 'न रत्नम्' इत्यादि शाब्दम् ।

प्रश्नपूर्वक प्रतिपादने आर्थी यथा —

'किमाराध्यं सदा पुण्यं
कश्च सेव्यः सदाऽऽगमः ।
को ध्येयो भगवान् विष्णुः
किं काम्यं परमं पदम् ॥'

अत्र व्यवच्छेद्यं पापादि आर्थमिति ।

उपेन्द्र झा
30/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
सुरसेना, पूर्णियाँ